# श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## UG-11.27- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ सप्तविं(म्)शोऽध्यायः ॥**

**उद्धव उवाच**

**क्रियायोगं(म्) समाचक्ष्व, भवदाराधनं(म) प्रभो ।**
**यस्मात्त्वां(यँ) ये यथार्चन्ति, सात्वताः(स्) सात्वतर्षभ ॥ 1॥**

**एतद् वदन्ति मुनयो, मुहुर्निः(श्)श्रेयसं(न्) नृणाम् ।**
**नारदो भगवान् व्यास, आचार्योऽङ्गिरसः(स्) सुतः ॥ 2॥**

**निः(स्)सृतं(न्) ते मुखाम्भोजाद्, यदाह भगवानजः ।**
**पुत्रेभ्यो भृगुमुख्येभ्यो, देव्यै च भगवान् भवः ॥ 3॥**

एतद् वै सर्ववर्णाना- माश्रमाणां(ञ्) च सम्मतम् ।
श्रेयसामुत्तमं(म्) मन्ये, स्त्रीशूद्राणां(ञ्) च मानद ॥ 4॥

एतत् कमलपत्राक्ष- कर्मबन्धविमोचनम् ।
भक्ताय चानुरक्ताय, ब्रूहि विश्वेश्वरेश्वर ॥ 5॥

श्रीभगवानुवाच
न ह्यन्तोऽनन्तपारस्य, कर्मकाण्डस्य चोद्धव ।
सं(ङ्)क्षिप्तं(वँ) वर्णयिष्यामि, यथावदनुपूर्वशः ॥ 6॥

वैदिकस्तान्त्रिको मिश्र, इति मे त्रिविधो मखः ।
त्रयाणामीप्सितेनैव, विधिना मां(म्) समर्चयेत् ॥ 7॥

यदा स्वनिगमेनोक्तं(न्), द्विजत्वं(म्) प्राप्य पूरुषः ।
यथा यजेत मां(म्) भक्त्या, श्रद्धया तन्निबोध मे ॥ 8॥

अर्चायां(म्) स्थण्डिलेऽग्नौ वा, सूर्ये वाप्सु हृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत् - स्वगुरुं(म्) माममायया ॥ 9॥

पूर्वं(म्) स्नानं (म्) प्रकुर्वीत, धौतदन्तोऽङ्गशुद्धये ।
उभयैरपि च स्नानं(म्), मन्त्रैर्मृद्ग्रहणादिना ॥ 10॥

सन्ध्योपास्त्यादिकर्माणि, वेदेनाचोदितानि मे ।
पूजां(न्) तैः(ख्) कल्पयेत् सम्यक्, सं(ङ्)कल्पः(ख्) कर्मपावनीम् ॥ 11॥

शैली दारुमयी लौही, लेप्या लेख्या च सैकती ।

मनोमयी मणिमयी, प्रतिमाष्टविधा स्मृता ॥ 12॥

चलाचलेति द्विविधा, प्रतिष्ठा जीवमन्दिरम् ।

उद्वासावाहने न स्तः(स्), स्थिरायामुद्धवार्चने ॥ 13॥

अस्थिरायां(वँ) विकल्पः(स्) स्यात्, स्थण्डिले तु भवेद् द्वयम् ।

स्नपनं(न्) त्वविलेप्याया- मन्यत्र परिमार्जनम् ॥ 14॥

द्रव्यैः(फ्) प्रसिद्धैर्मद्यागः(फ्), प्रतिमादिष्वमायिनः ।

भक्तस्य च यथालब्धैर्- हृदि भावेन चैव हि ॥ 15॥

स्नानालं(ङ्)करणं(म्) प्रेष्ठ- मर्चायामेव तूद्धव ।

स्थण्डिले तत्त्वविन्यासो, वह्नावाज्यप्लुतं(म्) हविः ॥ 16॥

सूर्ये चाभ्यर्हणं(म्) प्रेष्ठं(म्), सलिले सलिलादिभिः ।

श्रद्धयोपाहृतं(म्) प्रेष्ठं(म्), भक्तेन मम वार्यपि ॥ 17॥

भूर्यप्यभक्तोपहृतं(न्), न मे तोषाय कल्पते ।

गन्धो धूपः(स्) सुमनसो, दीपोऽन्नाद्यं(ञ्) च किं(म्) पुनः ॥ 18॥

शुचिः(स्) सम्भृतसम्भारः(फ्),प्राग्दर्भैः(ख्) कल्पितासनः ।

आसीनः(फ्) प्रागुदग् वार्चे- दर्चायामथ सम्मुखः ॥ 19॥

कृतन्यासः(ख्) कृतन्यासां(म्),मदर्चां(म्) पाणिना मृजेत् ।
कलशं(म्) प्रोक्षणीयं(ञ्) च, यथावदुपसाधयेत् ॥ 20॥

तदद्भिर्देवयजनं(न्), द्रव्याण्यात्मानमेव च ।
प्रोक्ष्य पात्राणि त्रीण्यद्भिस्- तैस्तैर्द्रव्यैश्च साधयेत् ॥ 21॥

पाद्यार्घ्याचमनीयार्थं(न्), त्रीणि पात्राणि दैशिकः ।
हृदा शीर्ष्णाथ शिखया, गायत्र्या चाभिमन्त्रयेत् ॥ 22॥

पिण्डे वाय्वग्निसं(म्)शुद्धे, हृत्पद्मस्थां(म्) परां(म्) मम ।
अण्वीं(ञ्) जीवकलां(न्) ध्यायेन्- नादान्ते सिद्धभाविताम् ॥ 23॥

तयाऽऽत्मभूतया पिण्डे, व्याप्ते सम्पूज्य तन्मयः ।
आवाह्यार्चादिषु स्थाप्य, न्यस्तां(ङ्)गं(म्) मां(म्) प्रपूजयेत् ॥ 24॥

पाद्योपस्पर्शार्हणादी- नुपचारान् प्रकल्पयेत् ।
धर्मादिभिश्च नवभिः(ख्), कल्पयित्वाऽऽसनं(म्) मम ॥ 25॥

पद्ममष्टदलं(न्) तत्र, कर्णिकाकेसरोज्ज्वलम् ।
उभाभ्यां(वँ) वेदतन्त्राभ्यां(म्), मह्यं(न्) तूभयसिद्धये ॥ 26॥

सुदर्शनं(म्) पाञ्चजन्यं(ङ्), गदासीषुधनुर्हलान् ।
मुसलं(ङ्) कौस्तुभं(म्) मालां(म्), श्रीवत्सं(ञ्) चानुपूजयेत् ॥ 27॥

नन्दं(म्) सुनन्दं(ङ्) गरुडं(म्), प्रचण्डं(ञ्) चण्डमेव च ।
महाबलं(म्) बलं(ञ्) चैव, कुमुदं(ङ्) कमुदेक्षणम् ॥ 28॥

दुर्गां(वँ) विनायकं(वँ) व्यासं(वँ), विष्वक्सेनं(ङ्) गुरून् सुरान् ।
स्वे स्वे स्थाने त्वभिमुखान्, पूजयेत् प्रोक्षणादिभिः॥ 29॥

चन्दनोशीरकर्पूर- कुं(ङ्)कुमागुरुवासितैः ।
सलिलैः(स्) स्नापयेन्मन्त्रैर्- नित्यदा विभवे सति ॥ 30॥

स्वर्णघर्मानुवाकेन, महापुरुषविद्यया ।
पौरुषेणापि सूक्तेन, सामभी राजनादिभिः ॥ 31॥

वस्त्रोपवीताभरण- पत्रस्रग्गन्धलेपनैः ।
अलं(ङ्)कुर्वीत सप्रेम, मद्भक्तो मां(यँ) यथोचितम् ॥ 32॥

पाद्यमाचमनीयं(ञ्) च, गन्धं(म्) सुमनसोऽक्षतान् ।
धूपदीपोपहार्याणि, दद्यान्मे श्रद्धयार्चकः ॥ 33॥

गुडपायससर्पीं(म्)षि, शष्कुल्यापूपमोदकान् ।
सं(यँ)यावदधिसूपां(म्)श्च, नैवेद्यं(म्) सति कल्पयेत् ॥ 34॥

अभ्यं(ङ्)गोन्मर्दनादर्श- दन्तधावाभिषेचनम्।
अन्नाद्यगीतनृत्यादि, पर्वणि स्युरुतान्वहम् ॥ 35॥

विधिना विहिते कुण्डे, मेखलागर्तवेदिभिः ।
अग्निमाधाय परितः(स्), समूहेत् पाणिनोदितम्॥ 36॥

परिस्तीर्याथ पर्युक्षे- दन्वाधाय यथाविधि ।
प्रोक्षण्याऽऽसाद्य द्रव्याणि, प्रोक्ष्याग्नौ भावयेत माम् ॥ 37॥

तप्तजाम्बूनदप्रख्यं(म्), शं(ङ्)खचक्रगदाम्बुजैः।
लसच्चतुर्भुजं(म्) शान्तं(म्), पद्मकिं(ञ्)जल्कवाससम् ॥ 38॥

स्फुरत्किरीटकटक- कटिसूत्रवरां(ङ्)गदम् ।
श्रीवत्सवक्षसं(म्) भ्राजत्- कौस्तुभं(वँ) वनमालिनम् ॥ 39॥

ध्यायन्नभ्यर्च्य दारूणि, हविषाभिघृतानि च ।
प्रास्याज्यभागावाघारौ, दत्त्वा चाज्यप्लुतं(म्) हविः ॥ 40॥

जुहुयान्मूलमन्त्रेण, षोडशर्चावदानतः ।
धर्मादिभ्यो यथान्यायं(म्),मन्त्रैः(स्) स्विष्टकृतं(म्) बुधः ॥ 41॥

अभ्यर्च्याथ नमस्कृत्य, पार्षदेभ्यो बलिं(म्) हरेत् ।
मूलमन्त्रं(ञ्) जपेद् ब्रह्म, स्मरन्नारायणात्मकम् ॥ 42॥

दत्त्वाऽऽचमनमुच्छेषं(वँ), विष्वक्सेनाय कल्पयेत् ।
मुखवासं(म्) सुरभिमत्, ताम्बूलाद्यमथार्हयेत् ॥ 43॥

उपगायन् गृणन् नृत्यन्, कर्माण्यभिनयन् मम ।
मत्कथाः(श्) श्रावय(ञ्)छृण्वन्, मुहूर्तं(ङ्) क्षणिको भवेत् ॥ 44॥

स्तवैरुच्चावचैः(स्) स्तोत्रैः(फ्), पौराणैः(फ्) प्राकृतैरपि ।
स्तुत्वा प्रसीद भगवन्- निति वन्देत दण्डवत् ॥ 45॥

शिरो मत्पादयोः(ख्) कृत्वा, बाहुभ्यां(ञ्) च परस्परम् ।
प्रपन्नं(म्) पाहि मामीश, भीतं(म्) मृत्युग्रहार्णवात् ॥ 46॥

इति शेषां(म्) मया दत्तां(म्), शिरस्याधाय सादरम् ।
उद्वासयेच्चेदुद्वास्यं(ञ्), ज्योतिर्ज्योतिषि तत् पुनः ॥ 47॥

अर्चादिषु यदा यत्र, श्रद्धा मां(न्) तत्र चार्चयेत् ।
सर्वभूतेष्वात्मनि च, सर्वात्माहमवस्थितः ॥ 48॥

एवं(ङ्) क्रियायोगपथैः(फ्), पुमान् वैदिकतान्त्रिकैः ।
अर्चन्नुभयतः(स्) सिद्धिं(म्), मत्तो विन्दत्यभीप्सिताम् ॥ 49॥

मदर्चां(म्) सम्प्रतिष्ठाप्य, मन्दिरं(ङ्) कारयेद् दृढम् ।
पुष्पोद्यानानि रम्याणि, पूजायात्रोत्सवाश्रितान् ॥ 50॥

पूजादीनां(म्) प्रवाहार्थं(म्), महापर्वस्वथान्वहम् ।
क्षेत्रापणपुरग्रामान्, दत्त्वा मत्सार्ष्टितामियात् ॥ 51॥

प्रतिष्ठया सार्वभौमं(म्), सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं(न्), त्रिभिर्मत्साम्यतामियात् ॥ 52॥

मामेव नैरपेक्ष्येण, भक्तियोगेन विन्दति ।
भक्तियोगं(म्) स लभते, एवं(यँ) यः(फ्) पूजयेत माम् ॥ 53॥

यः(स्) स्वदत्तां(म्) परैर्दत्तां(म्), हरेत सुरविप्रयोः ।
वृत्तिं(म्) स जायते विड्भुग्, वर्षाणामयुतायुतम् ॥ 54॥

कर्तुश्च सारथेर्हेतो- रनुमोदितुरेव च ।
कर्मणां(म्) भागिनः(फ्) प्रेत्य, भूयो भूयसि तत्फलम् ॥ 55॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे सप्तविं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

